**धर्मव्रत** त्रि॰ धर्मे व्रतं संकल्पविशेषोयस्य । १धर्मरते । २धर्मस्य विश्वरूपाख्यपत्न्यां जातायां कन्यायां मरीचिकलत्रे स्त्री तत्कथा वायुपु॰ “आसीद्धर्मो महातेजाः सर्वविद्यानपारगः । विश्वरूपा च तत्पत्नी भर्तृव्रतपरायणा । तस्यां धर्मात् समुत्पन्ना कन्या धर्मव्रता सती । सर्वलक्षणसम्पन्ना लक्ष्मीरिव कुलाधिका” इत्युपक्रमे “मरीचेर्वचनं श्रुत्वा कन्या प्रोवाच तं मुनिम् । अहं धर्मव्रतानाम धर्मपुत्री तपोन्विता । पतिव्रतार्थं विप्रेन्द्र! चरामि परमं तपः । धर्मव्रतां मरीचिस्तामुवाच प्रीतिपूर्वकम् । पतिव्रता दर्शनान्मे भविष्यसि शुभव्रते ! । पतिव्रतेच्छया पृथ्वीं विचरामि ह्यऽहर्निशम् । त्वञ्चेत् पतिव्रता जाता भजे त्वां भज मां वरम् । लोके न त्वादृशी कन्या मम तुल्यो न ते वरः । धर्मव्रते ! धर्मपुत्रि ! तस्मात् त्वं भज साधुना । धर्मव्रता मुनिं प्राह धर्मं याचय सुव्रत ! तत् श्रुत्वा धर्मसगमन्मुनिं धर्मोददर्श ह । तेजःपुञ्जवरं नत्वा ह्यासनार्घ्यादिनार्च्चयत् । किमर्थमागतः पृष्टो मरीचिर्धर्ममब्रवीत् । कन्यार्थं भ्रमता पृथ्वीं दृष्टा ते कन्यका वरा । मह्यं कन्याञ्च तां देहि श्रेयस्तव भविष्यति । अर्घ्यादिना समभ्यर्च्य धर्मः प्राचेतसेरितम् । धर्मव्रतां समानीय दत्तवांस्तां मरीचये” । धर्मस्य व्रतम् । हेमाद्रिव्र॰ उक्ते २व्रतभेदे न॰ व्रतशब्दे दृश्यम् ।

**धर्मशाला** स्त्री धर्मार्थं शाला । धर्मार्थमन्नादिदानाधिकरणशालायाम् । धर्मसत्रादयोऽप्यत्र ।

**धर्मशासन** न॰ शास–भावे ल्युट् ६त॰ । १धर्मस्यानुशासने । करणे ल्युट् । २धर्मशास्त्रे च “शरीरकृत् प्राणदाता यस्य चान्नानि भुञ्जते । क्रमेणैते त्रयोऽप्युक्ताः पितरो धर्मशासने” भा॰ आ॰ ७२ अ॰ ।

**धर्मशास्त्र** न॰ शिष्यतेऽनेन शास–करणे ष्ट्रन् ६त॰ । धर्मशासने मन्वादिप्रणीते धर्मप्रतिपादके ग्रन्थभेदे स्मृतिशास्त्रे तस्य कर्त्तारश्च हेमाद्रिव्रतखण्डे दर्शिता यथा “शङ्खलिखितौ स्मृतयो धर्मशास्त्राणि तेषां प्रणेतारोमनुर्विष्णुयमदक्षाङ्गिरोऽत्रिबृहस्पत्युशनआपस्तम्बवशिष्ठकात्यायनपराशरव्याससङ्खलिखितसंवर्त्तगौतमशातातपहारीतयाज्ञवल्क्यप्राचेतसादयः” । यमः “मनुर्यमो-वसिष्ठोऽत्रिः दक्षो विष्णुस्तथाङ्गिराः । उशना वाक्पतिर्व्यास आपस्तम्बोऽथ गौतमः । कात्यायनो नारदश्च याज्ञवल्क्यः पराशरः । संवर्त्तश्चैव शङ्खश्च हारीतो लिखितस्तथा । एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा । तान्येवाति प्रमाणानि न हन्तव्यानि हेतुभिः” “आदिशब्दाच्च वृद्धदेवलसोमजमदग्निप्रजापतिविश्वामित्रवृद्धशातातपपैठीनसिपितामहबौधायनच्छागलेयजाबालिच्यवनमरीचिकश्यपाः” तथा हि भविष्यपुराणे “अष्टादशपुराणेषु यानि वाक्यानि पुत्रक ! । तान्यालोच्य महाबाहो ! तथा स्मृत्यन्तरेषु च । मन्वादिस्मृतयो याश्च षड्विंशत् परिकीर्त्तिताः । तासां वाक्यानि क्रमशः समालोक्य ब्रवीमि ते” इति । मन्वादिस्मृतीनां षड्त्रिंशत्त्वमुक्तम्, तच्चानन्तरोक्ताभिरेव पूर्य्यते । यानि पुनर्महाभारतरामायणविष्णुधर्मशिवधर्मप्रभृतीनि ब्रह्मपरिशिष्टानि च तानि च स्मृत्यन्तरेषु चेत्यनेनैवोक्तानि तथा चोक्तं भविष्यपुराणे “अष्टादश पुराणानि रामस्य चरितं तथा । विष्णुधर्माणि शास्त्राणि शिवधर्माश्च भारत ! । कार्ष्णञ्च पञ्चमोदेवो यन्महाभारतं स्मृतम् । सौराश्च धर्मा राजेन्द्र ! मानवोक्ता महीपते ! । जयेति नाम चैतेषां प्रवदन्ति मनीषिण इति” “तदपि स्मृत्यन्तरेषुचैवेत्यनेनैव परिगृहीतं वेदितव्यम्” हेमाद्रि॰ व्र॰ ।

**धर्मशील** त्रि॰ धर्मः धर्मसाधनं शीलमस्य धर्मं शीलयति शील–अण् वा । १धर्मस्वभावे २धर्मतत्परे । “तत्र स्नात्वा नरो राजन् ! धर्मशीलः समाहितः” भा॰व॰ ८४अ॰ ।

**धर्मसंहिता** स्त्री धर्मज्ञापिका संहिता, धर्मः संहितो निरूपितो यत्र वा । धर्मशास्त्रे अमरः ।

**धर्मसहाय** पु॰ धर्मे सहायः । सहाया इत्युपक्रमे “ऋत्विक्पुरोधसः स्युर्धर्मविद् द्विजतापसास्तथा धर्मे” सा॰ द॰ उक्ते ऋत्विगादौ ।

**धर्मसार** पु॰ धर्मेषु सारः । १श्रेष्ठपुण्यकर्मणि २तत्साधने च स च गरुड़पु॰ २२५ अ॰ विस्तरेणोक्तः ।

**धर्मसारथि** पु॰ धर्मः सारथिरिवास्य । धर्मसंघसहायके “शुक्रस्ततः शुचिस्तस्मात् चित्रकुर्धर्मसारथिः ! भाग॰ ६।१७।८

**धर्मसावर्णि** पु॰ एकादशे मनुभेदे । “मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् । अनागतस्तत्सुताश्च सत्यधर्मादयोदश” भा॰८।१३।१२

**धर्मसू** स्त्री धर्मं सुनोति सु–क्विप् । १धूम्याटखगे शब्दरत्ना॰ । २धर्मप्रेरके त्रि॰ “सोमो राजा वरुणः देवा धर्मसुवः” तैत्ति॰ ब्रा॰ १।७।८।२ ।

**धर्मसूत्र** न॰ धर्मः सूत्र्यतेऽनेन करणे अच् ६त॰ । धर्म-